# AMRITA VIDYALAYAM
## HALF YEARLY EXAMINATION 2017 - '18

**Class : VIII** **Marks : 80**
**Time : 2½ hrs**

# संस्कृतम्
## खण्डः क (अपठित अवबोधनम्)

**1. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत।**

एकदा शरीरस्य सर्वाणि इन्द्रियाणि - हस्तौ, पादौ, मुखं, नासिका, कर्णौ इत्यादीनि मिलित्वा अचिन्तयन् - "वयं सर्वे प्रतिदिनं परिश्रमं कुर्मः। एतद् उदरं सर्वं स्वीकरोति, स्वयं किमपि कार्यं न करोति। अद्यप्रभृति वयमपि कार्यं न करिष्यामः"। एवं चिन्तयित्वा सर्वाणि अङ्गानि कार्यम् अत्यजन्। पादौ स्थिरौ भूत्वा अतिष्ठताम्। हस्तौ निश्चलौ अभवताम्। मुखं अन्नकणम् अपि न प्रावेशयत् एवं द्वे दिने व्यतीते जाते। शनैः शनैः सर्वाणि अङ्गानि शिथिलानि अभवन्। कार्यशक्तिः क्षीणा अभवत्। कथमपि पुनः मिलित्वा विचारम् अकुर्वन् - "अहो! अस्माकं प्रमादः। भुक्तस्य अन्नस्य पाचनं तु उदरमेव करोति। एतद् एव अस्मभ्यं शक्तिं ददाति। अस्य कृपया एव वयं जीवामः।

**I. एक पदेन उत्तरत।** **2**

क. शनैः शनैः सर्वाणि अङ्गानि कीदृशानि अभवन्?

ख. कार्यसाधिका का भवति?

ग. भुक्तस्य अन्नस्य पाचनं किम् अङ्गं करोति?

घ. पादौ कीदृशौ भूत्वा अतिष्ठताम्?

**II. पूर्णवाक्येन उत्तरत।** **2**

क. कानि अङ्गानि मिलित्वा कार्यं त्यक्तवन्तः?

ख. कस्य कृपया अङ्गानि शक्तियुक्तानि भवन्ति?

**III. भाषिककार्यम्।** **4**

क. 'करिष्यामः' इति क्रियापदस्य कर्तृपदं किम्?
(वयमपि, वयम्, त्वम्, आवाम्)

ख. 'अहो! अस्माकं प्रमादः' इत्यत्र 'अस्माकं' इति सर्वनामपदं कस्मै प्रयुक्तम्?
(इन्द्रियेभ्यः, अङ्गेभ्यः, इन्द्रेभ्यः, भागेभ्यः)

ग. 'भुक्तस्य' इति विशेषणस्य विशेष्यपदं किम्?
(निश्चलौ, स्थिरौ, चञ्चलौ, अन्नस्य)

घ. 'चलौ' इति पदस्य किं विपर्ययपदम् अत्र प्रयुक्तम्?
(अचलौ, सचलौ, निर्चलौ, निश्चलौ)

**IV. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।** **2**

## खण्डः ख (रचनात्मक लेखनम्)

**2. चित्रं दृष्ट्वा मञ्जूषातः प्रदत्तपदानां सहायतया संस्कृते पञ्चवाक्यानि रचयत।** 10



मञ्जूषा

| |
|---|
| भवने प्रीतिभोजः, जनाः, पङ्क्तिद्वये, अनेके, भोजनं कुर्वन्ति, एकः परिवेशयति, सर्वेषाम् अग्रे, स्थाल्यः, मग्नाः, जनद्वयम् भोजनम् आनयतः, पृष्ठे, एकः वृक्षः, हरिते पट्टे उपविष्टाः। |

अथवा

"वृक्षाणां महत्वम्" इति विषयम् अधिकृत्य मञ्जूषातः पदानि चित्वा संस्कृते पञ्चवाक्यानि लिखत।

| |
|---|
| औषधं, काष्ठं, पत्राणि, पुष्पाणि, सहायकाः, फलानि, वायुशोधनं, प्रकृतेः, यच्छन्ति, रक्षकाः, प्राणवायुम्, पर्यावरणस्य |

**3. सौम्यः दिल्ली नगरे वसति। तस्य मित्रं सुमतिः असमप्रदेशे वसति। सौम्येन गणतन्त्रदिवसस्य शोभायात्राया भागः गृहीतः। सः स्वानुभवान् स्वमित्रं सुमतिं प्रति पत्रे लिखति। मञ्जूषातः पदानि विचित्य पत्रं पूरयन्तु।** 5

ए-14 वसन्तविहारः
नवदिल्लीतः
तिथिः 05-05-2004

प्रियसखि सुमते,

क. ---------।

अत्र कुशलं तत्रास्तु। अहं ख. -------- सज्जायां व्यस्तः आसम्। अतः विलम्बेन तव पत्रस्य उत्तरं ददामि। अस्मिन् वर्षे मयापि गणतन्त्रदिवसस्य शोभायात्रायां भागः ग. ----------।

अस्माकं विद्यालयस्य घ. ---------- राजपथे स्वकलायाः प्रदर्शनम् अकरोत्। अहं गरबानृत्यस्य ङ. ----------- आसम्। छात्राणां राष्ट्रगानस्य ओजस्वी ध्वनिः च. ---------- गुञ्जितम् अकरोतम्। स्वराष्ट्रस्य सैन्यबलानां पराक्रमप्रदर्शनानि

विचित्रवर्णानि परिदृश्यानि छ. ----------- च दृष्ट्वा अहं गौरवान्वितः अस्मि।
ज. ---------- बाल्यावस्थायाः स्वप्नः तत्र पूर्णः जातः।
झ. ------------ वन्दनीयौ।

भवतः ञ. ------------

सौम्यः

| |
|---|
| आवरणम् |
| सविधे |
| सुश्री सुमतिः |
| ९८, भवतारमार्गः |
| असमप्रदेशः - 533277 |

मञ्जूषा

| |
|---|
| पितरौ, गृहीतः, नमस्ते, मम, सुहृद्, राजपथम्, वाद्यवृन्दम्, लोकनृत्यानि, गणतन्त्रदिवस समारोहस्य, प्रमुख सञ्चालकः |

## खण्डः ग (अनुप्रयुक्त व्याकरणम्)

**4. उचित संख्यापदेन रिक्तस्थानानि पूरयत।** **4**

एकेन छात्रेण वार्षिकपरीक्षायां संस्कृते क. --------- (75) अङ्काः, गणिते ख. --------- (60) अङ्काः, विज्ञाने ग. -------- (54) अङ्काः, योगे च घ. --------- (50) अङ्काः लब्धाः। तेन संस्कृते सर्वाधिकाः अङ्काः प्राप्ताः।

**5. रिक्तस्थानानि उचितरूपेण पूरयत।** **7**

| | | | |
|---|---|---|---|
| क. | -------- | --------- | एतेभ्यः |
| ख. | राज्ञा | --------- | --------- |
| ग. | -------- | --------- | पितृणाम् |
| घ. | -------- | --------- | मातृषु |
| ङ. | -------- | --------- | पास्यथः |
| च. | -------- | अपृच्छतम् | --------- |
| छ. | -------- | --------- | रक्षेत |

**6. मञ्जूषायाः उचितम् अव्ययपदं चित्वा वाक्यानि पूरयत।** **5**

| |
|---|
| इतस्ततः, सर्वत्र, यथा, तथा, वृथा, उपरि, अथः, कुत्र |

क. वृक्षाणाम् -------- वानराः कूर्दन्ति।
ख. ईश्वरः ---------- व्यापकः अस्ति।
ग. समुद्रेषु वृष्टिः --------- भवति।
घ. भवान् श्वः ----------- गमिष्यति?
ङ. दग्धाः अश्वाः ---------- भ्रमन्ति।

**7. एतेषां विभक्तिं वचनं च लिखत।** **4**

क. अस्याम् ख. मातरम् ग. महाज्ञानी घ. आत्मनः

8. **मञ्जूषात: उचितानि विशेषणानि चित्वा लिखत।** 2

| समृद्धा, उत्तमः, सुरम्यां, कठिनाः, शुद्धं, रम्याः |
|---|

क. वाटिकायाम् ख. भाषा ग. प्रश्नाः घ. जलम्

9. **रेखांकितपदेषु प्रकृति-प्रत्ययौ संयोज्य-विभज्य वा लिखत।** 3

क. मुनिः तस्य चिकित्सां <u>कृत्वा</u> पालनमकरोत्।

ख. सः उपदेशं <u>दा + तुमुन्</u> प्रार्थितवान्।

ग. सा इंजीनियरिंग् उपाधिं <u>प्र + आप् + ल्यप्</u> अमेरिकां गतवती।

## खण्डः घ (पठितावबोधनम्)

10. **अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत।**

अष्टावक्रस्य शरीरस्य अष्टौ अङ्गानि वक्राणि आसन्। परं सः महाज्ञानी आसीत्। जनकस्य सभासदः अष्टावक्रं दृष्ट्वा हसितवन्तः। स्वयं जनकोऽपि हसितवान्। अष्टावक्रः एतेन अपमानेन दुःखं न अनुभूतवान्। अपि तु सोऽपि हसितवान्। तं हसन्तं दृष्ट्वा राजा जनकः उक्तवान् यत् भवतः हासस्य किं कारणम्? तदा अष्टावक्रः अवदत् येन नृपेण ज्ञानस्य उपदेशकाय सम्मानस्य घोषणा कृता अस्ति तस्य सभायां नश्वर शरीरस्य महत्वम् अवगम्य हसन्ति जनाः। अत्र ज्ञानस्य महिमानं कः अवगमिष्यति?

**I. एकपदेन उत्तरत।** 2

क. अष्टावक्रः कः आसीत्?

ख. अष्टावक्रस्य कति अङ्गानि वक्राणि आसन्?

ग. के अष्टावक्रं दृष्ट्वा हसितवन्तः?

घ. कः ज्ञानस्य उपदेशकाय घोषणा कृता?

**II. पूर्णवाक्येन उत्तरत।** 1

क. अष्टावक्रः जनकं किम् अवदत्?

**III. भाषिककार्यम्।** 2

क. 'सुखम्' इति पदस्य अत्र किं विलोमपदं प्रदत्तम्?
(हासं, दुःखं, नश्वरं, कारणं)

ख. 'एतेन अपमानेन' - अनयोः पदयोः विशेषणं किम्?
(एतेन, अवमानेन, दुःखं, अष्टावक्रः)

11. **अधोलिखित पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत।**

विविध-वेष-भाषाभिः भूषिता धरा।
नैकशास्त्रचर्चया प्रपूरिता धरा॥
सर्वसुख-समृद्धिभावपोषिका धरा।
भूतले सदैव शान्तिघोषिका धरा।
व्यास-भास-कालिदास-गर्विता धरा।
रम्यकाव्यकल्पनैश्च हर्षिता धरा।
संस्कृतेन संस्कृतिप्रतिष्ठिता धरा।

लोक-मंगलाय सर्वतः स्थिता धरा।

**I. एकपदेन उत्तरयत।** **1**

क. संस्कृतेन का प्रतिष्ठिता?

ख. धरा किमर्थं सर्वतः स्थिता?

**II. पूर्णवाक्येन उत्तरयत।** **2**

क. भारती धरा कैः गर्विता अस्ति?

ख. धरा काभिः भूषिता अस्ति?

**III. भाषिककार्यम्।** **2**

क. 'सदैव' सन्धिच्छेदं कुरुत।

ख. 'परितः' इत्यस्मिन् अर्थे पद्यांशे किं पदं प्रयुक्तम्?

**12. अधोलिखितवाक्येषु रेखांकितपदानां समुचितं सन्धिं सन्धिच्छेदं वा कृत्वा लिखत।** **3**

क. भारतस्य राजचिह्नं 'सत्यमेव जयते' <u>अस्यैव</u> उदाहरणमस्ति।

ख. रक्षाबन्धनम् <u>इत्युक्ते</u> रक्षार्थं बन्धनम्।

ग. यदि भवान् <u>सदुपदेशं</u> श्रोतुम् इच्छति तर्हि मम गुरुदक्षिणा?

**13. रिक्तस्थानानि पूरयत।** **6**

क. भगिन्यः भ्रातुः --------- कामानां कुर्वन्ति।

ख. भूतले सदैव -------- धरा।

ग. संस्कृत भाषा भारतस्य ----------- अनुशासनस्य वाणि अस्ति।

घ. मूषकस्य शरीरं --------- आसीत्।

ङ. ---------- अपि जनाः स्वीयं स्वप्नं साकारं कर्तुं शक्नुवन्ति।

च. ईश्वरचन्द्रस्य परिवारस्य --------- समीचीना नासीत्।

**14. अधोलिखितवाक्येषु रेखाङ्कित पदानि आधृत्य प्रश्ननिर्माणं कुरुत।** **5**

क. मणिबन्धे <u>रक्षासूत्रं</u> बध्यते।

ख. अनुसन्धानार्थं सा <u>अमेरिकां</u> गतवती।

ग. मुनिः <u>वने</u> तपः करोति स्म।

घ. वेदाः <u>चत्वारः</u> सन्ति।

ङ. विश्वस्य प्राचीनतमा भाषा <u>संस्कृत भाषा</u> अस्ति।

**15. अधोलिखितवाक्यानि कथाक्रमेण संयोज्य लिखत।** **4**

क. एतत् श्रुत्वा व्याघ्रः दुखितः अभवत्।

ख. सः मुनिः आश्रमसमीपे एकस्य मूषकस्य शावकं दृष्टवान्।

ग. मुनिं खादितुं प्रहारं कृतवान्।

घ. विडालस्य भयकारणात् मुनिः तं विडालमकरोत्।

ङ. परिणामतः व्याघ्रः पुनः मूषकरूपेण परिवर्तितः।

च. कुक्कुरस्य भयकारणात् तं विडालं कुक्कुरं सः मुनिः कृतवान्।

छ.	तं मुनिं व्याघ्रं च दृष्ट्वा सर्वे जनाः 'एषः पूर्वं मूषकः आसीत्' इति वदन्ति स्म।

ज.	एकस्मिन् वने एकः मुनिः स्वाश्रमं निर्माय तपः करोति स्म।

**16. प्रसङ्गानुसारं रेखांकितपदानाम् उचितम् अर्थं चित्वा लिखत।** **2**

क.	कुक्कुरस्य भयस्य कारणं ज्ञात्वा तं व्याघ्रं कृतवान्।
(विज्ञाय, दृष्ट्वा, श्रुत्वा)

ख.	अस्याः भाषायाः अपरं वैशिष्ट्यं वर्तते सूत्रात्मकशैली।
(परम्, अन्यम्, अनन्यम्)